**अभिसंहित** त्रि० अभि+सम्+धा—कर्मणि कर्त्तरि वा क्त । १ फलोद्देशेन कृते २ अभिसन्धिविषयभूते ३ अभिसन्धिकर्त्तरि च “विमुक्तिदायेऽनभिसंहितेषु” रुचिस्तवः ।

**अभिसन्ताप** पु० अभिसन्ताप्यतेऽनेन अभि+सम्+तप—णिच्करणे अच् । १ अभिशापे । तप—भावे घञ् । २अभितः सन्तापे । तप—आधारे । घञ् । ३ युद्धे ।

**अभिसन्धक** त्रि० अभि+सम्+धा—क—स्वार्थे कन् । १ परगुणासहनेन आक्षेपके, “वैडालव्रतिकोज्ञेयोहिंस्रः सर्वाभिसन्धकः मनुः” । “अभिसन्धकः परगुणासहनेन सर्वाक्षेपक इति” कुल्लू० । [२ फलोद्देशे ३ वञ्चने च ।

**अभिसन्धा** स्त्री अभि+सम्+धा—भावे अङ् । १ अभिसन्धौ

**अभिसन्धान** न० अभि+सम्+धा—ल्युट् । १ परवञ्चने । “पराभिसन्धानपरं यद्यप्यस्य विचेष्टितम्” रघुः । “पराभिसन्धानपरामन्त्रिणः” काद० २ फलोद्देशे ३ अभिसन्धौ च । “फलाभिसन्धानपरा न योगिनः” पुरा० ।

**अभिसन्धाय** पु० अभि+सम्+धा—भावे घञ् । १ अभिसन्धौ फलाद्युद्देशे । ल्यप् । २फलाद्युद्दिश्येत्यर्थे अव्य० ।“अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्” गीता ।

**अभिसन्धि** पु० अभि+सम्+धा—भावे कि । १ फलाद्युद्देशे । “स्वर्गाभिसन्धि सुकृतं वञ्चनामिव मेनिरे” कुमा० । “स्वधाभुजः काम्यफलाभिसन्धौ” रुचिस्तवः ।

**अभिसन्धित** त्रि० अभिसन्धा जाताऽस्य तार० इतच् । १ जाताभिसन्धौ अभिसन्धिविषये ।

**अभिसम्पत्ति** त्रि० अभि+सम्+पद—क्तिन् । १ अभितः सम्पत्तौ अन्यरूपस्यान्यथाभवने, “चित्यस्याहवनीयाभिसम्पत्तेः” कात्या० १८,६,३५ । “आहवनीय एव चित्याभिसम्पत्ति श्रवणात् “यो वाव चितोऽग्निर्निधीयते तामेवेष्टकामेष सर्वोऽग्निरभिसम्पद्यत” इतिश्रुतिः एकवारं चित्यस्योपरि निधानेनाहवनीयाग्नेरेव सर्व्वदा चित्यात्मकतासम्पन्ना” कर्क० ।

**अभिसम्पद्** स्त्री अधिका सम्पद् प्रा०स० । १ अधिकसम्पत्तौ । अभिलक्ष्य संख्यां सम्पद् । तत्तत्संख्यादिसाम्येन सम्पन्नतायाम् “तान्युभयान्येकविंशतिः सम्पद्यन्ते द्वादश मासाः पञ्चर्त्तवस्त्रय इमे लोकाः असावादित्य एकविंशः एतामभिसम्पदम्”शत०ब्रा० । “यैषा संख्यासम्पत्तिस्तामभिलक्ष्य भवति” भा० ।सम्पदमभिलक्ष्य अव्ययी० टच् समा० । अभिसम्पदम् सम्पदमभिलक्ष्यीकृत्येत्यर्थे अव्य० ।

**अभिसम्पात** पु० अभि+सम्+पत—आधारे घञ् ॥ १ युद्धे । भावे घञ् । २ पतने । करणे घञ् । ३ अभिशापे लोकप्रसिद्धिः ।

**अभिसम्बन्ध** पु० अभि+सम्+बन्ध—घञ् । १ अभितः सम्बन्धे “द्रव्याणां कर्म्मसंयोगे गुणात्वनाभिसम्बन्धः” “फलार्थित्वात्तु स्वामित्वे नाभि” जै०सू० “वैजिकादभिसम्बन्धादनुरुन्ध्यादघं त्र्यहम्” मनुः २ वाक्यादौ आकाङ्क्षितपदान्वये च. पदानामन्वयश्च पदार्थायन्वयोग्यत्वएव ।

**अभिसर** त्रि०अभितःसरति सृ+ट स्त्रियां ङीप् । १ सहाये, २ अनुचरे । “तथैवाभिसरास्तेषां त्यक्तात्मानो जये धृताः” भा०उ०प० । “अथ साभिसरं शरैस्तरस्वी”माघः ।

**अभिसरण** न० अभि+सृ—ल्युट् । १ अभिगमने २ नायकयोरेकतरेण रागेण सङ्केतस्थानगमने च । [३ उत्सृष्टे च

**अभिसर्ज्जन** न० अभि+सृज—भावे घञ् । १ दाने,२ बधे

**अभिसाय** अव्य० आभिमुख्ये अव्ययी० । सायाह्नाभिमुख्ये । “श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चन्द्रमसोऽभिरामताम्” माघः ।

**अभिसार** पु० अभि+सृ—आधारादौ घञ् । १ युद्धे, २ साहाय्ये, ३ साधने, ४ स्त्रियाः पुंसो वा संभोगार्थं निर्ज्जनसङ्केतस्थानगमने च । “आरब्धे रभसान्मया प्रियसखि ! क्रीडाभिसारोत्सवे” । अभिसारप्रकारश्च । “स्वेषु गात्रेषु संलीना मूकीकृतविभूषणा” । अवगुण्ठनसंवीता कुलजाऽभिसरेद्यदि । विचित्रोज्ज्वलवेशा तु वलन्नूपुरनिस्वना प्रमोदस्मेरवदना स्याद्वेश्याऽभिसरेद्यदि । मदस्खलितसंलापा विभ्रमोत्फुल्ललोचना । आविद्धगतिसञ्चारा स्यात् प्रेष्याऽभिसरेद्यदि ॥ क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनम् । मालयञ्च श्मशानञ्च नद्यादीनां तटी तथा एवं कृताभिसाराणां पुंश्चलीनां विनोदने, स्थानान्यष्टौ तथा ध्वान्तच्छन्नेषु क्वचिदाश्रये” इति सा०द० । कर्त्तरि घञ् । अनुचरे पु० “अभिसारेण सर्व्वेण ततोयुद्धमवर्त्तत” भा०ब०प० ।

**अभिसारिका** स्त्री अभिसरति अभिसारयति वा कान्तं सङ्केतस्थानं अभि+सृ—णिच्—वा ण्वुल् । १ “अभिसारयते कान्तं या मन्मथवशंवदा । स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका” सा०द० उक्ते नायिकाभेदे “अनभिज्ञास्तमिस्राणां दुर्द्दिनेष्वभिसारिकाः” कुमा० “यः सञ्चरोऽभूदभिसारिकाणाम्” रघुः ।

**अभिसारिन्** त्रि० अभिसरति णिनि । १आभिमुख्येन गन्तरि २अनुचरे च स्त्रियां ङीप् । “षष्ठं त्रिष्टुपे त्रैष्टुभपदा